# shrIbagalAShTottarashatanAmastotram

# શ્રીબગલાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Bagala Ashtottarashatanamastotram 3

File name : bagalAShTottarashatanAmastotram3.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : D.K.M. Kartha

Description-comments : kAlIvilAsatantra. See corresponding nAmAvalI

Latest update : December 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2022

*sanskritdocuments.org*

# શ્રીબગલાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીદેવ્યુવાચ ।
વગલા શતનામાનિ કથ્યન્તાં મે કૃપાનિધે ।
યન્ત્રોક્તં અન્યતન્ત્રેષુ, અધુના કથય પ્રભો ॥ ૧॥

શ્રીઈશ્વર ઉવાચ ।
અસ્યાઃ શ્રીવગલા દેવ્યાઃ શતનામસ્તોત્રસ્ય
શ્રીસદાશિવઋષિર્ગાયત્રીછન્દઃ શ્રીવગલામુખી દેવતા
ધર્માર્થકામમોક્ષાર્થસિધ્દ્યે વિનિયોગઃ ।

ૐ વશિની વશપૂજ્યા ચ વલિકા વસુદા વસુઃ ।
વાગ્વાદિની વયોરૂપા બલાબલવતી તથા ॥ ૨॥

વિષમા વિકટા વેધા વિશાલા વિમના વિધિઃ ।
વિદ્યા ચ વેદરૂપા ચ બન્ધ્યા ચ વેષધારિણી ॥ ૩॥

વેણી ચ વિકટા વેશ્યા નાનાવેષપરિચ્છદા ।
વયોરૂપા ચ વૃધ્દ્વા વિકલા વસુમતીતિ ચ ॥ ૪॥

વગલા વામની દેવી વિષ્ણુપૂજ્યા વિનોદિની ।
વૈષ્ણવી શિષ્ણ માતા ચ વારાહી બ્રાહ્મણી વરા ॥ ૫॥

વલાવલવતી વાલા વિધેશ્ચ પરિપૂજિતા ।
વિશિષ્ટા બ્રહ્મપૂજ્યા ચ નાનાવેષવિનોદિની ॥ ૬॥

વૈકુણ્ઠરૂપિણી બ્રાહ્મી વિધિપૂજ્યા વિધુન્તુદા ।
વલ્લભા વલરૂપા ચ અશેષ વલધારિણી ॥ ૭॥

વેદજ્ઞા વેદમાતા ચ વિશાલ નયનોજ્જ્વલા ।
વેદમાતા વિમાતા ચ વેદગર્ભા વિમોક્ષણી ॥ ૮॥

વિરૂપાક્ષી વલા વાલી કૃષ્ણવિમલરૂપિણી ।

વારાહી ચ વલાકા ચ વલિની વર્ણરૂપિણી ॥ ૯॥

ગન્ધિની ગન્ધરૂપા ચ ગયાગઙ્ગાપ્રભા તથા ।
ગોવર્ધની ચ ગોવિન્દપૂજિતા ચ ગદાધરી ॥ ૧૦॥

ગહના ગુહ્યરૂપા ચ ગોરૂપા ગોકુલેશ્વરી ।
ગોલોકવાસિની ચૈવ નિત્યા ગોલોકરૂપિણી ॥ ૧૧॥

ગરિમા ચ ગરિષ્ઠા નિત્યા ગોવર્ધનરૂપિણી ।
ગઙ્ગાધરી ચ ગોવિન્દા ગોવિન્દપૂજિતા ગદા ॥ ૧૨॥

ગહના ગુહ્યરૂપા ચ તથૈવ ગન્ધરૂપિણી ।
ગણાર્હા ગાનદાગાનરૂપિણી ગણ મોહિની ॥ ૧૩॥

નીલમાલા મનોન્મત્તા લલજિહ્વા લલાટિની ।
આનન્દરૂપિણી આદ્યા આચાર્ય સ્વાંશુરૂપિણી ॥ ૧૪॥

મૂર્તિશ્ચ મુખ્યરૂપા ચ મહામોક્ષપ્રદાયિની ।
ખેલત્ ખઞ્જગામી ચ ખેલા ખલખલા તથા ॥ ૧૫॥

ઈશ્વરી ઈશ્વરારાધ્યા અકાર ૐ સ્વરૂપિણી ।
વર્ણા ચ વગલામુખ્યાઃ શતનામ ઇતીરિતમ્ ॥ ૧૬॥

અષ્ટોત્તરશતં નામ યઃ પઠેન્નિત્યમુત્તમમ્ ।
સર્વસિદ્ધીશ્વરો ભૂત્વા દેવીપુત્રો ભવેત્તુ સઃ ॥ ૧૭॥

ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં તસ્ય સિદ્ધિઃ પ્રજાયતે ।
નાન્યથા ફલભાગીસ્યાત્ કલ્પકોટિશતૈરપિ ॥ ૧૮॥

ઇતિ શ્રીકાલીવિલાસતન્ત્રે ષોડશપટલે શ્રીવગલામુખ્યાઃ
શતનામસ્તોત્રં સમાપ્તમ્ ।

ૐ તત્સત્ ।

*shrIbagalAShTottarashatanAmastotram*

pdf was typeset on December 26, 2022

Please send corrections to *sanskrit@cheerful.com*